# ॥ तुलसी पूजा ॥

॥ऽथ तुलसी पूजा प्रारंभः॥
॥श्रीगणेशाय नमः॥
॥ऽथ तुलसीपूजनं लिख्यते॥
श्रीमहादेव उवाच॥
शुभे पक्षे शुभे वारे शुभे ऋक्षे शुभोदये ।
केशवार्थे शुभांशे च रोपयेत्तुलसीं मुनिः ॥१॥
गृहस्थो गृहमध्ये वा गृहस्थोपवनेपि वा ।
शुचौ देशे तु तुलसीमर्च्चयेद्बुद्धिमान्नरः ॥२॥
मूले च वेदिकां कृत्वा आलवालसमन्विताम् ।
प्रातःसंध्याविधिं कृत्वा स्नानपूर्वं दिने दिने ॥३॥
गायत्र्यष्टजपं कृत्वा तुलसीं पूजयेत्ततः ।
प्राङ्मुखोदङ्मुखो वापि स्थित्वा प्रयतमानसः ॥४॥
ध्यायेच्च तुलसीं देवीं श्यामां कमललोचनाम्
प्रसन्नपद्मकल्हारवराभयचतुर्भुजाम् ॥५॥
किरीटहारकेयूरकुंडलादिविभूषिताम् ।
धवलांशुकसंयुक्तां पद्मासननिषेदुषीम् ॥६॥ इति ध्यानम्॥
देवि त्रैलोक्यजननि सर्वलोकैकपावनि ।
आगच्छ भगवत्यत्र प्रसीद तुलसि द्रुतम् ॥७॥ आवाहनम्॥
सर्व देवमये देवि सर्वदा विष्णुवल्लभे ।
रत्नस्वर्णमयं दिव्यं गृहाणासनमव्यये ॥८॥ आसनम्॥
सर्वदेवमयाकारे सर्वदेवनमोऽस्तुते ।
पाद्यं गृहाण देवेशि तुलसि त्वं प्रसीद मे ॥९॥ पाद्यम्॥
सर्व देवमयाकारे सर्वांगमणिशोभिते ।
इदमर्घंगृहानत्वं देवि दैत्यांन्तकप्रिये ॥१०॥ अर्घ्यम्॥
सर्वलोकस्य रक्षार्थं सदा संनिधिकाररिणि॥
गृहाण तुलसि प्रीत्या इदमाचमनीयकं ॥११॥ आचमनम्॥
गंगादिभ्यो नदीभ्यश्च समानीतमिदं जलम् ।
स्नानार्थं तुलसि स्वच्छं प्रीत्या तत्प्रतिगृत्ह्यताम् ॥१२॥ स्नानम्॥
क्षिरोदमथनोद्भूते चंद्रलक्ष्मीसहोदरे ।
गृत्ह्यतां परिधानार्थमिदं क्षौमांबरं शुभे ॥१३॥ वस्त्रम्॥
श्रीगंधं कुंकुमं दिव्यं कर्पूरागरुसंयुतम् ।
कल्पितं ते महादेवि प्रीत्यर्थं प्रतिगृत्ह्यताम् ॥१४॥ गंधम्॥

नीलोत्पलं तु कल्हारमालत्यादीनि शोभने ।
पद्मादिगंधवंतीनि पुष्पाणि प्रतिगृत्व्यताम् ॥१५॥ पुष्पम्॥
धूपं गृहाण् देवेशि मनोहारि सगुग्गलम् ।
आज्यमिस्रं तु तुलसि भक्ताभिष्टप्रदायिनि ॥१६॥ धूपम्॥
अज्ञानतिमिरांधस्य ज्ञानदीपप्रदायिनी ।
त्वया तु तुलसि प्रिता दीपोयं प्रतिगृत्व्यताम् ॥१७॥ दीपम् ।
नमस्ते जगतां नाथे प्राणिनां प्रियदर्शने ।
यथाशक्ति मया दत्तं नैवेद्यम् प्रतिगृत्व्यताम् ॥१८॥ नैवेद्यम्॥
नमो भगवते श्रेष्ठे नारयनजगन्मये ।
तुलसि त्वरया देवि पानीयं प्रतिगृत्व्यताम् ॥१९॥ पानीयम्॥
अमृतेमृतसंभूते तुलस्यमृतरूपिणि ।
कर्पूरादिसमायुक्तं तांबूलं प्रतिगृत्व्यताम् ॥२०॥ तांबूलम्॥
दक्षिणा दक्षिणकरे त्वद्भक्तानां प्रियंकरि ।
करोमि ते सदा भक्त्या विष्णुकांते प्रदक्षिणाम् ॥२१॥
नमो नमो जगद्धात्र्यै जगदाद्यै नमो नमः ।
नमो नमो जगद्भूत्यै नमस्ते परमेश्वरि ॥२२॥
प्रसीद मम देवेशि कृपया परया सदा ।
अभिष्टफलसिद्ध्यर्थं कुरु मे माधवप्रिये ॥२३॥
इत्येवमर्च्चयेन्नित्यं प्रातरेव शुचिर्नरः ।
मध्याह्ने वाथ सायाह्ने पूजयेत्प्रयतो नरः ॥२४॥
॥इति तुलसीपूजासंपूर्णा॥

---

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

---

Please send corrections to sanskrit@cheerful.com
Last updated November 12, 2002